संस्कृत

याज्ञिक - स्मार्त

अ. नं. १८

महान्यास (मुद्रित)

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशाय नमः ॥ ॥ श्रीदक्षिणामूर्तये नमः ॥ हरिः ॥ ॐ मू ॥ अथ बोधायन
सूत्रोक्तन्यासः लिख्यंते अथातः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्चनान
रा भिषेकविधिं व्याख्यास्यामो या ते रुद्रेति शिखायाम् ॥१॥ ॐ या ते रुद्र
(1) शिवा तनूरघोरापापकाशिनी ॥ तया नस्तनुवा शंतमया गिरिशंता श्री
१ भिचाकशीहि ॥ शिखायै नमः अस्मिन्महत्यर्णवेंतरिक्षे भवा अधि ॥
तेषांꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ शिरसे नमः सहस्राणि सह १
स्रशो ये रुद्रा अधि भूम्यां ॥ तेषांꣳ स० सि ॥ ललाटाय नमः सहꣳ
सः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृ

तसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत्॥भ्रुवोर्मध्यायन
मः॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षी
(1A) यमामृतात्॥नेत्राभ्यांनमः॥नमःस्रुत्यायचपथ्यायच कर्णाभ्यांनमः॥मा
नस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानो
रुद्रभामिनोवधीर्हविष्मंतोनमसाविधेमते॥नासिकायैनमः॥अवत
त्यधनुस्त्वंसहस्राक्षशतेषुधे॥निशीर्यशल्यानांमुखाशिवोनःसुम
नाभव॥मुखायनमः॥नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the ...

तेꣳ स॰ कंठयनमः॥ नीलग्रीवाः शितिकंठाः दिवꣳ रुद्रा उपश्रिताः॥
तेषाꣳ स॰ सि उपकंठायनमः॥ नमस्ते अस्त्वायुधायानातताय धृष्ण
वे॥ उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ बाहुभ्यां नमः॥ याते
हेतिर्मीढुष्टम हस्ते बभूव ते धनुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मया
परिभुज॥ उपबाहुभ्यां नमः॥ ये तीर्थानि प्रचरंति सृकावंतो नि
षंगिणः॥ तेषाꣳ स॰ सि॥ हस्ताभ्यां नमः॥ सद्योजातं प्रपद्यामि सद्यो
जाताय वै नमो नमः॥ भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः॥ अंगु

(2A)

ष्टाभ्यां नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः॥
कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बल
प्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नः॥ तर्जनीभ्यां नमः॥
अघोरेभ्यो यघोरेभ्या घोरघोरतभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु
रुद्ररूपेभ्यः मध्यमाभ्यां नमः॥ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो
रुद्रः प्रचोदयात्॥ अनामिकाभ्यां नमः॥ ईशानः सर्वविद्यानामीश्वरः सर्व
भूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवों॥ कनि

(3)

ष्टिकाभ्यां नमः॥ नमोवः किरिभ्यो देवानां हृदयेभ्यः॥ हृदयाय नमः॥ नमो गणेभ्यो गण
पतिभ्यश्च वो नमः॥ पृष्ठ्ये नमः॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः॥ पार्श्वा
भ्यां नमः॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत॥ अनेशन्नस्येषव आ
भुरस्य निषंगथिः॥ जठराय नमः॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जा
तः पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा वि
धेम॥ नाभ्यै नमः॥ मीढुष्टम शिवतम शिवो नः सुमना भव॥ परमे
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि॥ कं 3

(3A)

द्यै नमः॥ येभूतानामधिपतयो विशिखासः कपर्दिनः॥ तेषां॰ सं॰सि॥
गुह्यायनमः॥ सशिराजातवेदाः अक्षरं ब्रह्मसंमितं॥ वेदानां॰ शिरउत्त
मं॥ जातवेदसे शिरसामाला॥ ब्रह्मभूर्भुवः स्वरों॥ जातवेदसे सुनवाम
सोममरातीयतो निदहाति वेदः॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिं
धुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां॥
दुर्गां देवीं शरण्यमहं प्रपद्ये सुतरसि तरसे नमः॥ अग्ने त्वं पारया नव्यो अस्मा
न्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तन

(५) यायशंयोः॥विश्वानि नोदुर्गहा जातवेदः सिंधुंननावादुरितातिपर्षि॥अ
ग्ने अत्रिवन्मनसागृणानोस्माकंबोध्यविताततूनां॥पृतनाजितंसहमान
मुग्रमग्निंहुवेमपरमात्सधस्थात्॥सनपर्षदतिदुर्गाणिविश्वाक्षाम
द्देवोअतिदुरितात्यग्निः॥अपानायनेमः॥मानोमहांतमुतमानोअर्भ
कंमानउक्षंतमुतमानउक्षितं॥मानोवधीःपितरंमोतमातरंप्रियामा
४ नस्तनुवोरुद्ररीरिषः॥ऊरुभ्यानमः॥एषतेरुद्रभागस्तंजुषस्वतेनाव ४
सेनपरोमूजवतोतीह्यवततधन्वापिनाकहस्तःकृत्तिवासाः॥जानु

भ्यां नमः ॥ स॰सृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पते प
(4A) रिदीयारथेन रक्षोहामित्राँ॰ अपबाधमानः ॥ जंघाभ्यां नमः ॥ विश्वं भूतं भुवनं
चित्रं बहुधा जातं जायमानं च यत् ॥ सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ गु
ल्फाभ्यां नमः ॥ ये पथां पथिरक्षय ऐलबृदाय व्युधः ॥ तेषा॰ स॰ सि ॥ पादा
भ्यां नमः ॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ॥ अहीँ॰श्च सर्वाञ्जम्भ
यंत्सर्वाश्च यातुधान्यः ॥ कवचाय हुं ॥ नमो बिल्मिने च कवचिने च ॥ उपकवचा
य हुं ॥ नमो अस्तु नीलग्रीवाय सहस्रायमीढुषे ॥ अथो ये अस्य सत्वानोहं तेभ्यो क
रं नमः ॥ तृतीयनेत्राभ्यां नमः ॥ प्रमुंच॰ धन्वनस्त्वमुभयोरार्त्न्योर्ज्यां ॥ याश्च

तेहस्त इषवः परातानभगवोवप ॥ अस्त्रायफट् ॥ यएतावंतश्चभूयांसश्चदिशोरुद्रावि
तस्थिरे ॥ तेषांसं०सि ॥ दिग्बंधायनमः ॥ ॐ नमोभगवतेरुद्रायेतिनमस्कारंन्यसे
त् ॥ ॐ मूर्ध्नेनमः ॥ नेंनासिकायैनमः ॥ मोंललाटायन० ॥ भंमुखाय० ॥ गंकंठा० ॥ मू
वंहृदयाय० ॥ तेंदक्षिणहस्ताय० ॥ रुंवामहस्ताय० ॥ द्रांनाभ्यै० ॥ यंपादाभ्यां० ॥ स
द्योजातंप्र० ॥ नमः ॥ पादाभ्यांनमः ॥ वामदेवा० मः ॥ ऊरुभ्यांनमः ॥ अघोरेभ्यो०
भ्यः ॥ हृदयायनमः ॥ तत्पुरुषा०यानू ॥ मुखायनमः ॥ ईशानःसर्ववि०वो ॥ मूर्ध्नेन
मः ॥ हंसहंसेतियाब्रूयाद्धंसोनामसदाशिवः ॥ एवंन्यासविधिंकृत्वाततःसंपुटमा ८
रभेत् ॥ ॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंसतेस्तु
जो॰८

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com